# A-I/1/2282/ 21

## द्वितीयसत्रार्द्धम्

## प्रथमपत्रम्

## वेदः

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. रुक्मः कः?
2. उखाधारणादिमन्त्राः कस्मिन् अध्याये वर्णिताः?
3. जले जायमानः अग्निः कः?
4. पार्थिवाग्नेः स्थानं किम्?
5. दिवसस्य वर्णः कः?
6. उखायाः स्थापनं कस्य वृक्षस्य आसन्दे भवति?

**अथवा**

स्वराः कति सन्ति?

7. क्रान्तद्रष्टा कः?
8. मन्त्रद्रष्टारः के?
9. चितिः का?

**अथवा**

उष्माणः कति?

10. प्रथमचितेः निर्माणं कस्मिन् अध्याये वर्णितम्?
11. प्रातिशाख्ये ग्रन्थे कति अध्यायाः सन्ति?

**अथवा**

उपध्मानीयवर्णं लिखत।

12. प्रातिशाख्यानुसारं कति वर्णाः सन्ति ?

13. जिह्वामूलीयवर्णस्य देवता का ?

**अथवा**

आख्यातस्य किं गोत्रम् ?

14. प्रातिशाख्यग्रन्थस्य पञ्चमेऽध्याये कति सूत्राणि सन्ति ?

15. विसर्जनीयः कः ?

**अथवा**

व्यञ्जनस्य उच्चारणकालः कियान् ?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीय यज्ञैः घृतेन त्वं तन्वं वर्धयस्व सत्याः सन्तुयजमानस्य कामाः॥ अस्य मन्त्रस्य व्याख्यां कुरुत।

17. अग्ने त्वं पुरीष्यो रयिमान्पुष्टिमाँ असि। शिवाः कुत्वा दिशः सर्वाः स्वं योनिमिहासदः॥

व्याख्यां कुरुत।

**अथवा**

अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता। गोभाज इत्किलासथ यत्सनवथ पूरुषम्॥

अस्य मन्त्रस्य व्याख्यां कुरुत।

18. याः फलिनिर्या अफला अपुष्पायाश्च पुष्पिणीः। बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वत्वꣳ हसः॥

–व्याख्यां लिखत।

19. नमोस्तु सर्पेभ्यो ये के च पृथिवीमनु। ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः॥

अस्य मन्त्रस्य व्याख्यां लिखत।

**अथवा**

अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम्। अपाꣳ रेताꣳसि जिन्वति। इन्द्रस्य त्वौजसा सादयामि॥ इति मन्त्रं व्याख्यायत।

20. जनपत्या ओषधयो वृषायिषत न हि च नास्मभ्यमजावयो वलगम्॥ इति सूत्रं विवृणुत।

**अथवा**

ह्रस्वकण्ठ्योपधं विसर्जनीयान्तमरिफितं विवृत्या।

सूत्रस्यास्याभिप्रायं प्रतिपादयत॥

**स. दीर्घोत्तरीयप्रश्नः समाधेयः।** **(1×20=20)**

21. प्रतिशाख्यस्य चतुर्थेऽध्याये वर्णितानि कानिचन पञ्चसूत्राणि उदाहरणपुरस्सरं स्पष्टयत।

**अथवा**

उखाधारणस्य वैशिष्ट्यं लिखत।

**अथवा**

द्वादशाध्यायस्य केषाञ्चन त्रयाणां मन्त्राणां महीधरदिशा भाष्यं विवृणुत।

# A-I/2/2283/ 21

## द्वितीयसत्रार्द्धम्

## द्वितीयपत्रम्

## वेदः

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. दर्शपूर्णमासयागः कति दिनात्मकः?
2. दर्शपूर्णमासे प्रयुज्यमानं मन्त्रमेकं लिखत।
3. कतिपयब्राह्मणग्रन्थानां नामानि लिखत।
4. विश्ववेदस इति कस्य स्तुतिः?
5. अध्वरशब्दस्य कोऽर्थः?
6. कति वेदाङ्गानि सन्ति, कानि च तानि?
7. सायणभाष्यस्य नाम किम्?
8. श्रौतसूत्रं कस्मिन् वेदाङ्गे अन्तर्भवति?
9. शतपथब्राह्मणं कस्य वेदस्य?
10. हव्यवाट् कः भवति?
11. शतपथब्राह्मणस्य पञ्चमाध्याये किं वर्ण्यते?

**अथवा**

अग्नेः नामान्तराणि लिखत।

12. दुवस्यत इति शब्दस्यार्थं लिखत।

**अथवा**

अध्वरब्देन किमुच्यते?

13. दर्शपूर्णमासयागे कः प्रधानर्त्विक् भवति?

**अथवा**

दर्शपूर्णमासे पूर्वस्यां दिशि स्थापितस्य अग्नेः नाम किम्?

14. आहवनीयाग्निः कस्यां दिशि प्रतिष्ठापितः भवति?

**अथवा**

चतुर्णां वेदानामुपवेदान् लिखत।

15. विधिवाक्यानि वेदस्य कस्मिन् भागे भवन्ति?

**अथवा**

आस्तिकमतानि कति सन्ति?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. कविशस्तो ब्रह्मशंसितो घृताहवनः॥ इति मन्त्रं व्याख्यात।

17. चमसो देवपानः। अराँ इवाग्ने नेमिर्देवांस्त्वं परिभूरसि॥ इति मन्त्रं व्याख्यात।

**अथवा**

बृहच्छोचा यविष्ठ्य॥ स नः पृथुः श्रवाय्यम्॥ इति मन्त्रं व्याख्यात।

18. अग्निसमार्जनकर्मणः प्रशंसां यथाब्राह्मणं लिखत।

**अथवा**

'सप्तदशो वै प्रजापतिः' इति वाक्यं विवृणुत।

19. अग्निविषयकं मन्त्रत्रयं लिखत।

**अथवा**

प्रयाजानाम् ऋतुत्वं कथमिति स्पष्टयत।

20. 'अग्निस्सर्वा देवाताः' इति वाक्यं स्पष्टयत।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. पुरोडाशशब्दनिष्पत्तिं यथाब्राह्मणं विशदयत।

**अथवा**

ब्राह्मणग्रन्थानां वेदत्वं प्रतिपादयत।

**अथवा**

पञ्चदश दर्शपूर्णमासमन्त्रान् लिखत।

# A-I/3/2284/ 21

## द्वितीयसत्रार्द्धम्

## तृतीयपत्रम्

## वेदः

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. दर्शपौर्णमासेष्टियागेषु कस्य प्राथम्यम्?
2. अग्न्यन्वाधानं केन क्रियते?
3. पौर्णमासेष्टियागे अग्नये कति कपालपुरोडाशाः विद्यन्ते।

**अथवा**

आचार्यः सायणः कस्य राज्ञः अमात्यः आसीत्?

4. "वाग्यमनम्" किम्?
5. प्रयाजाः कति भवन्ति?
6. "शकटसम्बन्धि-दक्षिणचक्रारोहणम्" केन मन्त्रेण भवति?

**अथवा**

"सप्त हस्तासोऽस्य" इत्यस्य कोऽभिप्रायः?

7. कात्यायनश्रौतसूत्रे द्वितीयाध्याये कति कण्डिकाः सन्ति?
8. आग्नीध्रः केन वेदेन सम्बद्धः अस्ति?
9. दर्शपौर्णमासेष्टियागस्य दक्षिणा का?

**अथवा**

"ऊहः" इत्यस्य कोऽभिप्रायः?

10. उत्कर-लक्षणं किम्?
11. कात्यायनश्रौतसूत्रस्य प्रणेता कः?
12. वेदस्य अनुबन्ध-चतुष्टयं किम्?

13. "यजुष:" किं लक्षणम् ?

**अथवा**

वेदस्य षडङ्गानि कानि ?

14. मन्त्रस्य लक्षणं किम् ?

15. छन्दस: किं लक्षणम् ?

**अथवा**

द्वितीयाध्यायस्य आरम्भे किं वर्णितम् ?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. "अपराह्णे व्रतोपायनीयमश्नीत: सर्पिषाऽसुहितौ।" इति सूत्रं विवेचयत।

17. "देवता वर्द्धय त्वमिति सर्वत्रानुषजति।" इति सूत्रं यथा ग्रन्थं विवेचयत।

**अथवा**

"त्रि: फलीकरणम्" ससूत्रं स्पष्टयत।

18. वेदाङ्गानां प्रयोजनं प्रतिपादयत।

**अथवा**

वेदस्य अनुबन्धचतुष्टयं यथाशास्त्रं वर्णयत।

19. स्वाध्यायस्य दृष्ट-फलं प्रतिपादयत।

20. वेद-स्वाध्यायविमर्शं सायणानुसारं निरूपयत।

**अथवा**

"उल्मुके उदूहत्यनुयाजाश्चेत्।" इति सूत्रं सविस्तरं व्याख्यात।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. दर्शेष्टियागस्य परिचयं दैवतं द्रव्यनिर्देशपुरस्सरं स्पष्टयत।

**अथवा**

ऋग्वेदभाष्यभूमिकाया: उपादेयतां स्वगिरा विवेचय।

# A-I/4/2285/ 21

## द्वितीयसत्रार्द्धम्

## चतुर्थपत्रम्

## वेदः

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. यज्ञोपकरणानि कतिधा भवन्ति ?
2. कति अङ्गुलात्मकं दीर्घं भवति अरणिपात्रम् ?
3. "देवयोनिः" इति पदस्य कोऽभिप्रायः ?

**अथवा**

"अग्निहोत्रं जुहोति" इत्यत्र का विधिः ?

4. कति पात्राणि यज्ञायुधसंज्ञकानि ?
5. द्रोणकलशस्य किं लक्षणम् ?
6. "चन्दनः" इति यज्ञीयवृक्षस्य गुणाः के ?

**अथवा**

"प्राशस्त्यनिन्दान्यतरपरं वाक्यं" किम् ?

7. यज्ञमधुसूदनग्रन्थस्य प्रणेता कः ?
8. "रावणः" इति कस्य यज्ञीयवृक्षस्य अपरं नाम ?

**अथवा**

अर्थसङ्ग्रहग्रन्थस्य प्रणेता कः ?

9. "इध्मप्रव्रश्चनानि" इति पदस्य कोऽर्थः ?
10. आधाने कति सम्भाराः भवन्ति ?
11. क्रमस्वरूपं किम् ?

**अथवा**

"पर्युदासः" इति पदस्य कोऽभिप्रायः ?

12. मन्त्रलक्षणं किम्?

13. परिसंख्याविधेः उदाहरणं किम्?

14. "द्वादशलक्षणी" इति कस्य ग्रन्थविशेषस्य विशेषणम्?

15. निषेधस्य लक्षणं किम्?

**अथवा**

अर्थसङ्ग्रहस्य मङ्गलाचरणं लिखत।

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. श्रुतिक्रमलक्षणं सविस्तरं प्रतिपादयत।

17. अधिकारविधेः स्वरूपं वर्णयत।

**अथवा**

"नामधेयप्रामाण्यम्" यथाग्रन्थं विवेचयत।

18. अर्थवादस्य लक्षणं तद्भेदांश्च प्रतिपादयत।

19. यज्ञीयवृक्षाणां नाम्ना परिचयो देयः।

**अथवा**

मन्थनपात्राणां परिचयो देयः।

20. "ग्रहः" इति यज्ञपात्रस्य स्वरूपं तद्भेदांश्च प्रतिपादयत।

**अथवा**

आधाने सम्भाराः के? इति विस्तरं व्याख्यायत।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. यज्ञमधुसूदनग्रन्थस्य वर्ण्यविषयम्, उपयोगितां च प्रतिपादयत।

**अथवा**

मीमांसाशास्त्र-प्रवेशे अर्थसङ्ग्रहस्य भूमिकां स्वगिरा स्पष्टयत।